# Paratpara Shrirama Dhamavarnanam

# પરાત્પર શ્રીરામધામવર્ણનમ્

## Document Information

Text title : Shriramadhama Svarupavarnanam

File name : shrIrAmadhAmasvarUpavarNanam.itx

Category : raama

Location : doc_raama

Transliterated by : P. Sudarshana

Proofread by : P. Sudarshana

Description/comments : shrImadvashiShThabharadvAja saMvAda

Latest update : November 16, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 11, 2024

*sanskritdocuments.org*

# પરાત્પર શ્રીરામધામવર્ણનમ્

શ્રીભરદ્વાજ ઉવાચ -
વેદવેદાન્તસારજ્ઞ વિરઞ્ચિપ્રભવોત્તમ ।
ભવતા યત્પરિજ્ઞાતં તન્ન જાનન્તિ કેચન ॥ ૧॥

અતસ્ત્વાં પરિપૃચ્છામિહરેર્ધામ્નાં હિ કારણમ્ ।
કિઞ્ચ તત્ પરમં ધામ માધુર્યૈશ્વર્યભૂષણમ્ ॥ ૨॥

યત્ર સર્વાવતારાણામાદિકારણ વિગ્રહઃ ।
ક્રીડતિ કૃપયા મે ત્વં તત્વતઃ કથય પ્રભી ॥ ૩॥

શ્રીવશિષ્ઠ ઉવાચ -
સાધુ પૃષ્ટં ત્વયા તાત ગુહ્યાદ્ ગુહ્યતમં મહત્ ।
સારાત્ સારતમં વેદસિદ્ધાન્તં પ્રવદામિ તે ॥ ૪॥

શ્રૂયતાં સાવધાનેન રહસ્યમતિદુર્લભમ્ ।
રામભક્તં વિના કાપિ ન વક્તવ્યં ત્વયાઽનઘ ॥ ૫॥

સર્વેભ્યશ્ચાપિ લોકેભ્યશ્ચોર્ધ્વં પ્રકૃતિમણ્ડલાત્ ।
વિરજાયાઃ પરે પારે વૈકુણ્ઠં યત્પરં પદમ્ ॥ ૬॥

તસ્માદુપરિ ગોલોકઃ સચ્ચિદિન્દ્રિયગોચરઃ ।
તન્મધ્યે રામધામાસ્તિ સાકેતાખ્યં પરાત્પરમ્ ॥ ૭॥

શ્રીમદ્વૃન્દાવનાદીનિ તદ્ધામાવરણેષ્વપિ ।
સર્વેષામવતારાણાં સન્તિ ધામાન્યનેકશઃ ॥ ૮॥

કેવલૈશ્વર્યમુખ્યાનિ ધામાન્યેતાનિ સન્મતે ।
ઐશ્વર્યોપાસકા ભક્તા ધ્યાયન્તિ પ્રાપ્નુવન્તિ ચ ॥ ૯॥

એભ્યઃ પરતમં ધામ શ્રીરામસ્ય સનાતનમ્ ।
પૃથિવ્યાં ભારતે વર્ષ હ્યયોધ્યાખ્યં સુદુર્લભમ્ ॥ ૧૦॥

અખણ્ડસચ્ચિદાનન્દસન્દોહં પરમાદ્ભુતમ્ ।
વાઙ્મનોગોચરાતીતં ત્રિષુ કાલેષુ નિશ્ચિતમ્ ॥ ૧૧॥

ભૂતલેઽપિ ચ યદ્ધામ તથાપિ પ્રકૃતેર્ગુણાઃ ।
સંસ્પૃશન્તિ ન તજ્જાતુ જલાનિ કમલં યથા ॥ ૧૨॥

કાલઃ કર્મ સ્વભાવશ્ચ માયિકઃ પ્રલયસ્તથા ।
ઊર્મયઃ ષડ્ વિકારાશ્ચ ન યત્ર પ્રભવન્તિ હિ ॥ ૧૩॥

યદંશેન પ્રકાશેતે વિભૂતી દ્વે ચ સર્વદા ।
અધશ્ચોર્ધ્વમનન્તે ચ નિત્યે ચ પરમાદ્ભુતે ॥ ૧૪॥

વિભાતિ સરયૂર્યત્ર પશ્ચિમાદિત્રિદિક્ષુ ચ ।
વિરજાદ્યાઃ સરિચ્છ્રેષ્ઠાઃ પ્રકાશન્તે યદંશતઃ ॥ ૧૫॥

પરાન્નારાયણાચ્ચાપિ કૃષ્ણાત્ પરતરાદપિ ।
યો વૈ પરતમઃ શ્રીમાન્ રામો દાશરથિઃ સ્વરાટ્ ॥ ૧૬॥

યસ્યાનન્તાવતારાશ્ચ કલા અંશા વિભૂતયઃ ।
આવેશા વિષ્ણુબ્રહ્મેશાઃ પરબ્રહ્મસ્વરૂપભાઃ ॥ ૧૭॥

સ એવ સચ્ચિદાનન્દો વિભૂતિદ્વયનાયકઃ ।
વાત્સલ્યાદ્યદ્ભુતાનન્તકલ્યાણગુણવારિધિઃ ॥ ૧૮॥

રાજેન્દ્રમુકુટપ્રોદ્યદ્રત્નનીરાજિતાઙ્ઘ્રિણા ।
પિત્રા દશરથેનૈવ વાત્સલ્યામૃતસિન્ધુના ॥ ૧૯॥

કૌશલ્યાપ્રમુખાભિશ્ચ માતૃભિર્ભ્રાતૃભિસ્ત્રિભિઃ ।
સ્વદારસીતયા ચાથ દાસીભિશ્ચાલિભિસ્તથા ॥ ૨૦॥

સખિભિઃ સમરૂપૈશ્ચ દાસૈશ્ચામિતવિક્રમૈઃ ।
મત્પ્રમુખૈર્મુનીન્દ્રશ્ચ સુમન્ત્રાદ્યૈશ્ચ મન્ત્રિભિઃ ॥ ૨૧॥

પરિવારૈરનેકૈશ્ચ સચ્ચિદાનન્દમૂર્તિભિઃ ।
ભોગૈશ્ચ વિવિધૈર્દિવ્યૈર્ભોગોપકરણૈસ્તથા ॥ ૨૨॥

સાર્ધં વસતિ યત્રૈવ સ્વતન્ત્રઃ ક્રીડતે સદા ।
ક્ષણં હિત્વા ન તદ્ધામ ક્વચિદ્ યાતિ સ્વયમ્પ્રભુઃ ॥ ૨૩॥

તન્માધુર્યમયં નિત્યમૈશ્વર્યાન્તર્ગતં ધ્રુવમ્ ।
રામસ્યાતિ પ્રિયં ધામ નાસ્ત્યનેન સમં ક્વચિત્ ॥ ૨૪॥

અતોઽયોધ્યાં રસજ્ઞા યે સર્વદા પર્યુપાસતે ।
પ્રાકૃતૈશ્ચક્ષુભિર્નૈવ દૃશ્યતે સા કથઞ્ચન ॥ ૨૫॥

દેહત્રયવિનિર્મુક્તા રામભક્તિપ્રભાવતઃ ।
તુરીયસચ્ચિદાનન્દરૂપાઃ પશ્યન્તિ તાં પુરીમ્ ॥ ૨૬॥

અથ શ્રીરામચન્દ્રસ્ય યદ્ધામ પ્રકૃતેઃ પરમ્ ।
સચ્ચિદ્ઘનપરાનન્દં નિત્યં સાકેતસંજ્ઞકમ્ ॥ ૨૭॥

યદંશપ્રભવા લોકા વૈકુણ્ઠાદ્યાઃ સનાતનાઃ ।
વક્ષ્યામ્યહં મુનિશ્રેષ્ઠ તસ્યાવરણસપ્તકમ્ ॥ ૨૮॥

એકૈકસ્યાં દિશિ શ્રીમાન્ દશયોજનસમ્મિતઃ ।
અયોધ્યાયા બહિર્દેશઃ સ વૈ ગોલોકસંજ્ઞકઃ ॥ ૨૯॥

મહાશમ્ભુર્મહાબ્રહ્મા મહેન્દ્રો વરુણસ્તથા ।
ધનદો ધર્મરાજશ્ચ મહાન્તશ્ચ દિગીશ્વરાઃ ॥ ૩૦॥

એતદંશસમુદ્ભૂતા દેવા બ્રહ્મશિવાદયઃ ।
યથાધિકારં તે સર્વે સ્વસ્વલોકેષુ સંસ્થિતાઃ ॥ ૩૧॥

નિધયો નવધા નિત્યા દશાષ્ટૌ સિદ્ધયસ્તથા ।
ત્રયસ્ત્રિંશત્ તથા દેવા ગન્ધર્વાશ્ચાપ્સરોગણાઃ ॥ ૩૨॥

અન્યે ચ વિવિધા દેવા નિત્યાઃ સર્વે દ્વિજોત્તમ ।
સાયુધાઃ સગણાઃ શ્રીમદ્રામભક્તિપરાયણાઃ ॥ ૩૩॥

સપ્તર્ષયો મુનીન્દ્રાશ્ચ નારદસનકાદયઃ ।
પ્રથમાવરણે નિત્યં સાકેતસ્ય સ્થિતા મુને ॥ ૩૪॥

વેદમૂર્તિધરાઃ શાસ્ત્રવિદ્યાશ્ચ વિવિધાસ્તથા ।
પઞ્ચધા મુક્તયશ્ચાપિ રૂપવત્યઃ પૃથક્ પૃથક્ ॥ ૩૫॥

કર્મ જ્ઞાનં ચ વૈરાગ્યં યોગશ્ચ સાધનૈઃ સહ ।
દ્વિતીયાવરણે નિત્યં સ્વસ્વરૂપેણ સંસ્થિતાઃ ॥ ૩૬॥

સચ્ચિજ્જ્યોતિર્મયં બ્રહ્મ નિરીહં નિર્વિકલ્પકમ્ ।
નિર્વિશેષં નિરાકારં જ્ઞાનાકારં નિરઞ્જનમ્ ॥ ૩૭॥

અવાચ્યમગુણં નિત્યમનન્તં સર્વસાક્ષિકમ્ ।

ઇન્દ્રિયવિષયં સવરગ્રાહ્યં સ્વપ્રકાશકમ્ ॥ ૩૮॥

ન્યાસિનાં યોગિનાં યચ્ચ જ્ઞાનિનાં ચ લયાસ્પદમ્ ।
તૃતીયાવરણે તદ્ વૈ સાકેતસ્ય વિદુર્બુધાઃ ॥ ૩૯॥

કેચિત્તુ કેવલાનાં હિ તત્રાવાસં વદન્તિ હિ ।
ગર્ભોદકનિવાસી ચ ક્ષીરાર્ણવનિવાસકૃત્ ॥ ૪૦॥

શ્વેતદીપાધિપશ્ચાથ રમાવૈકુણ્ઠનાયકઃ ।
ચતુર્વિંશત્યવતારાઃ સન્તિ તત્ર પૃથક્ પૃથક્ ॥ ૫૧॥

સલોકાઃ સગણાઃ સર્વે મથુરા ચ મહાપુરી ।
પુરી દ્વારાવતી નિત્યા કાશી લોકૈકવન્દિતા ॥ ૪૨॥

કાઞ્ચી માયાપુરી દિવ્યા તથા ચાવન્તિકાપુરી ।
અયોધ્યામેવ સેવન્તે ચતુર્થાવરણે સ્થિતાઃ ॥ ૪૩॥

સાકેતપૂર્વદિગ્ભાગે શ્રીમતી મિથિલાપુરી ।
સર્વાશ્ચર્યવતી નિત્યા સચ્ચિદાનન્દરૂપિણી ॥ ૪૪॥

હર્મ્યઃ પ્રાસાદવર્યૈશ્ચ નાનારત્નપરિષ્કૃતૈઃ ।
વિમાનેર્વિવિધૈરુચ્ચૈશ્ચિત્રધ્વજપતાકિભિઃ ॥ ૪૫॥

ભ્રાજતે પરિખાદુર્ગવિવિધોદ્યાનસઙ્કુલા ।
તસ્યાં શ્રીમન્મહારાજઃ શીરકેતુઃ પ્રતાપવાન્ ॥ ૪૬॥

શ્વશુરો રામચન્દ્રસ્ય વાત્સલ્યાદિગુણાર્ણવઃ ।
નિમિવંશધ્વજઃ શૂરશ્ચતુરઙ્ગબલાન્વિતઃ ॥ ૪૭॥

વેદવેદાન્તસારજ્ઞઃ સર્વશાસ્ત્રવિશારદઃ ।
ધનુર્વેદવિદાં શ્રેષ્ઠઃ સર્વૈશ્વર્યસમન્વિતઃ ॥ ૪૮॥

દાસીદાસગણૈર્નિત્યં સેવિતો વસતિ સ્વરાટ્ ।
દક્ષિણસ્યાં દિશિ શ્રીમાન્ કોશલાયા ગિરિર્મહાન્ ॥ ૪૯॥

ભ્રાજતે ચિત્રકૂટઃ સચ્ચિન્મયાનન્દમૂર્તિમાન્ ।
નાનારત્નમયૈઃ શ્રૃઙ્ગર્વિચિત્રૈશ્ચિત્રપાદપૈઃ ॥ ૫૦॥

સુધાસ્વાદુફલે રમ્યૈઃ પુષ્પભારાવલમ્બિભિઃ ।
લતાજાલવિતાનૈશ્ચ ગુઞ્જદ્ભ્રમરસઙ્કુલૈઃ ॥ ૫૧॥

મત્તકોકિલસન્નાદૈઃ કૂજદ્ભશ્ચિત્રપક્ષિભિઃ ।
નૃત્યન્મત્તમયૂરૈશ્ચ નિર્ઝરૈર્નિમલામ્બુભિઃ ॥ ૫૨॥

સીતયા સહ રામસ્ય લીલારસવિવર્ધનઃ ।
ચિદ્રૂપા કાઞ્ચની ભૂમિઃ સમા રત્નૈર્વિચિત્રિતા ॥ ૫૩॥

સમન્તાત્ પર્વતેન્દ્રસ્ય દિવ્યકાનનમણ્ડિતા ।
યત્ર મન્દાકિની રમ્યા વહતિ શ્રીમતી નદી ॥ ૫૪॥

મણિનિર્મલતોયાઢ્યા બજ્રવૈડૂર્યબાલુકા ।
ગુઞ્જન્મધુવ્રતશ્રેણી પ્રફુલ્લમકલાકુલા ॥ ૫૫॥

ચિત્રપક્ષિકલક્વાણમુખરીકૃતદિક્ તટા ।
સ્વર્ણસ્ફટિકમાણિક્યમુક્તાબદ્ધતટદ્વયા ॥ ૫૬॥

ચિત્રપુષ્પલતાપુઞ્જકુઞ્જાનિ શોભિતાનિ ચ ।
મધુરાણિ સહસ્રાણિ તસ્યાસ્તીરદ્વયોરપિ ॥ ૫૭॥

સન્તિ નિત્યવિહારાર્થં જાનકીરામચન્દ્રયોઃ ।
અયોધ્યા પશ્ચિમે ભાગે કૃષ્ણસ્ય પરમાત્મનઃ ॥ ૫૮॥

નિત્યં વૃન્દાવનં ધામ ચિન્મયાનન્દમદ્ભુતમ્ ।
સમન્તાદ્ ભૂઃ સમા યત્ર કાઞ્ચની રત્નચિત્રિતા ॥ ૫૯॥

દિવ્યવૃક્ષૈર્લતા કુઞ્જૈર્ગુઞ્જન્મત્તમધુવ્રતૈઃ ।
નવીનૈઃ પલ્લવૈઃ સ્નિગ્ધૈઃ ફલૈઃ પુષ્પૈશ્ચ સન્નતૈઃ ॥ ૬૦॥

નદત્પક્ષિગણૈશ્ચિત્રૈર્મયૂરૈશ્ચ વિરાજતે ।
ગોવર્ધનો ગિરિર્યત્ર કાઞ્ચનો રત્નમણ્ડિતઃ ॥ ૬૧॥

લતાપાદપસઙ્કીર્ણો ગુહનિર્ભરકૂટવાન્ ।
નદી યત્ર મહાપુણ્યા કાલિન્દી કૃષ્ણવલ્લભા ॥ ૬૨॥

નીલરત્નજલોત્તુઙ્ગતરઙ્ગાવર્તમાલિની ।
ફુલ્લપઙ્કેરુહા મત્તકૂજદ્ભૃઙ્ગવિહઙ્ગમા ॥ ૬૩॥

સ્વર્ણઘટ્ટતટા રત્નબાલુકા શોભતે ભૃશમ્ ।
ગોપીગોપગણૈર્નિત્યૈર્ગો વૃન્દૈર્ગોપબાલકૈઃ ॥ ૬૪॥

શ્રીમન્નન્દયશોદાભ્યાં ભ્રાત્રા શ્રીમદ્બલેન ચ ।
સખીભિર્ગોપકન્યાભિર્વૃષભાનુસુતાદિભિઃ ॥ ૬૫॥

સાર્ધં વસતિ તત્રૈવ શ્રીકૃષ્ણઃ પુરુષોત્તમઃ ।
ક્કણદ્વેણુમનોહારી વિહારી રાસમણ્ડલે ॥ ૬૬॥

શ્રીરાધિકા મુખામ્ભોજમકરન્દમધુવ્રતઃ ।
સત્યાયાશ્ચોત્તરે ભાગે મહાવૈકુણ્ઠસંજ્ઞકમ્ ॥ ૬૭॥

મહાવિષ્ણોઃ પરં ધામ ધ્રુવં વેદૈઃ પ્રકીર્તિતમ્ ।
સર્વતઃ ખચિતા રત્નૈર્ભૂમિર્યત્ર હિરણ્મયી ॥ ૬૮॥

વાપીકુણ્ડતટાકૈશ્ચ દિવ્યારામૈર્વિરાજતે ।
સમન્તાચ્ચ નદી યત્ર વિરજા ફુલ્લપઙ્કજા ॥ ૬૯॥

સ્વચ્છ સ્ફટિકતોયૌઘાવર્ત તુઙ્ગતરઙ્ગિણી ।
સ્વર્ણરત્નતટા રમ્યા વજ્રસ્ફટિકસૈકતા ॥ ૭૦॥

ભઙ્ગપક્ષિગણોદ્ઘુષ્ટ કોલાહલસમાકુલા ।
પ્રાસાદૈઃ પાર્ષદેન્દ્રાણાં વિમાનૈર્વિવિધૈસ્તથા ॥ ૭૧॥

ચિત્રશાલોત્તમૈર્દિવ્યૈર્હર્મ્યજાલૈઃ સહસ્રશઃ ।
ઉચ્ચૈ ર્ધ્વજપતાગ્રૈરત્નકાઞ્જનચિત્રિતૈઃ ॥ ૭૨॥

લલનારત્નસઙ્ઘૈશ્ચ તલ્લોકં દ્યોતતેઽધિકમ્ ।
હૈરણ્યં સુમદ્રરત્નૈઃ ખચિતં પરમાયતમ્ ॥ ૭૩॥

તત્રૈકં ભવનં પ્રાંશુપ્રાસાદૈઃ પરિવારિતમ્ ।
સહસ્રૈઃ કલશૈ ભાતં ધ્વજૈશ્ચિત્રૈશ્ચ કેતુભિઃ ॥ ૭૪॥

મુક્તાદામવિતાનૈશ્ચ ચિત્રરત્નગવાક્ષકૈઃ ।
મહદ્વજકપાટૈશ્ચ મણિસ્તમ્ભૈઃ સહસ્રશઃ ॥ ૭૫॥

રતનાઙ્ગણં મહાકક્ષં ભાતિ તલ્લોકભૂષણમ્ ।
તન્મધ્યે શેષપર્યઙ્કે નિત્યસત્વૈકવિગ્રહઃ ॥ ૭૬॥

આસ્તે નારાયણો નિત્યઃ કિશોરઃ સદ્ગુણાર્ણવઃ ।
મેઘશ્યામશ્ચતુર્બાહુસ્તડિત્પીતામ્બરાવૃતઃ ॥ ૭૭॥

શ્યામસ્નિગ્ધાલક વ્રાતૈરુલ્લસન્મુખપઙ્કજઃ ।
મહદ્રત્નકિરીટેન કુણ્ડલાઙ્ગદકઙ્કણૈઃ ॥ ૭૮॥

શ્રીવત્સ કૌસ્તુભાભ્યાં ચ સદગન્ધિવનમાલયા ।

વૈજયન્ત્યોપવીતેન મુદ્રિકાહારનૂપુરૈઃ ॥ ૭૯॥

સ્વર્ણસૂત્રેણ કાઞ્જયાદિભૂષણૈર્ભૂષિતો વિભુઃ ।
શઙ્ખચક્રગદાપદ્માદ્યાયુધૈશ્ચાપ્યલઙ્કૃતઃ ॥ ૮૦॥

વિભાતિ શ્રીમતીભિશ્ચ શ્રીભૂલીલાદિશક્તિભિઃ ।
વિષ્વક્સેનાદયો નિત્યમુક્તા મુક્તાશ્ચ સૂરયઃ ॥ ૮૧॥

શુદ્ધસત્વાત્મકાઃ સર્વે શ્યામલાઙ્ગાશ્ચતુર્ભુજાઃ ।
દિવ્યગન્ધાનુલિપ્તાઙ્ગાઃ પદ્માક્ષાઃ પીતવાસસઃ ॥ ૮૨॥

સુકેશાઃ સુસ્મિતા દિવ્યમાલ્યાલઙ્કારભૂષિતાઃ ।
સર્વાયુધધરા દિવ્યલલનાયૂથ સેવિતાઃ ॥ ૮૩॥

ભગવન્તં શ્રિયા જુષ્ટં સેવન્તેઽહર્નિશં મુદા ।
મિથિલાચિત્રકૂટશ્ચ શ્રીમદ્વૃન્દાવનં તથા ॥ ૮૪॥

મહાવૈકુણ્ઠમેતદ્ધિ પઞ્ચમાવરણે મુને ।
તતસ્તુ પરમાનન્દસન્દોહં પરમાદ્ભુતમ્ ॥ ૮૫॥

અયોધ્યાયાશ્ચતુર્દિક્ષ ચતુર્વિંશતિયોજનમ્ ।
સર્વતો વેષ્ટિતં નિત્યં સ્વપ્રકાશં પરાત્પરમ્ ॥ ૮૬॥

સચ્ચિદેકરસાનન્દં માયાગુણવિવર્જિતમ્ ।
વાઙ્મનોગોચરાતીતં પ્રમોદારણ્યસંજ્ઞકમ્ ॥ ૮૭॥

રામસ્યાતિપ્રિયં ધામ નિત્યલીલારસાસ્પદમ્ ।
જામ્બૂનદમયી યત્ર ભૂઃ સમન્તાત્ પ્રકાશતે ॥ ૮૮॥

ચિદ્રૂપિણી સમા શ્લક્ષ્ણા પરાનન્દવિવર્ધિની ।
ચન્દ્રકાન્તોપલૈશ્ચિત્રા કકચિચ્ચ સ્ફટિકોપલા ॥ ૮૯॥

મણિભિઃ પદ્મરાગૈશ્ચ કચિદ્ વજ્રૈર્મહાપ્રભૈઃ ।
ઇન્દ્રનીલોપલૈર્બદ્ધા માણિક્યૈર્વિવિધૈઃ ક્વચિત્ ॥ ૯૦॥

રત્નૈર્વંશચ્છ દૈર્ભાતૈર્વૈડૂર્યૈઃ ખચિતા કચિત્ ।
અવિદ્ધાભિશ્ચ મુક્તાભિઃ પ્રવાલૈશ્ચક્વચિત્કચિત્ ॥ ૯૧॥

મહાર્ઘૈશ્ચિત્રિતા રત્નૈર્નીલપીતાસિતારુણૈઃ ।
સ્યમન્તૈર્ભ્રાજમાનૈશ્ચ ચિન્તારત્નચયૈસ્તથા ॥ ૯૨॥

ચિત્રિતા વસુધા સર્વા દ્યોતયત્યધિકં પ્રિયમ્ ।
પૂર્વાદિષુ ચતુર્દિક્ષુ ક્રમેણ તદ્વને મુને ॥ ૯૩॥

ગિરયઃ સન્તિ ચત્વારસ્તેષાં નામાનિ મચ્છૃણુ ।
શ્રૃગારાદ્રિશ્ચ રત્નાદ્રિસ્તથા લીલાદ્રિરેવ ચ ॥ ૯૪॥

મુક્તાદ્રિશ્ચ સ્વયા લક્ષ્મ્યા દ્યોતયન્તિ દિશો દશ ।
આહ્લાદિન્યાઞ્ચ પૂર્વસ્યાં યથા પ્રોદ્યન્ પ્રભાકરઃ ॥ ૯૫॥

નીલરત્નમયો ભાતિ શ્રૃઙ્ગારાદ્રિર્મનોહરઃ ।
દક્ષિણસ્યાં દિશિ શ્રીમદ્રત્નાદ્રિર્દ્યોતયન્ વનમ્ ॥ ૯૬॥

પીતરત્નમયઃ કાન્ત્યા ભૂદેવ્યા ભ્રાજતે પ્રિયઃ ।
પ્રતીચ્યાં દિશિ લીલાદ્રિર્લીલાલલિતકાન્તિભિઃ ॥ ૯૭॥

રાજતે રક્તરત્નાઢ્યો રામસ્ય રતિવર્ધનઃ ।
શ્રિયા દેવ્યા હિ લીલાર્થં મુક્તાદ્રિર્મણ્ડિતો મહાન્ ॥ ૯૮॥

ઉદીચ્યામુજ્વલો રત્નૈશ્ચન્દ્રકાન્તૈરુદઞ્ચતે ।
ચિત્રપુષ્પોઘસમ્પન્નૈર્લતાપુઞ્જવિતાનકૈઃ ॥ ૯૯॥

સ્વલ્પીકૃત સુધાસ્વાદુફલભારાતિસન્નતૈષ્પઃ ।
નવીનપલ્લવો પેતૈર્ગુઞ્જન્મત્તમધુવ્રતૈઃ ॥ ૧૦૦॥

કૂજચ્ચિત્રદ્વિજૈનીલકણ્ઠકેકિનિનાદિતૈઃ ।
પ્રમત્ત કોકિલક્કાણમુખરીકૃતદિમુખૈઃ ॥ ૧૦૧॥

વિચિત્રૈર્વિવિધૈઃ સ્નિગ્ધૈર્વૃક્ષૈર્નિત્યમધુસ્રવૈઃ ।
ઉન્નતૈઃ શિખરૈર્ભાતૈઃ સ્યન્દમાનૈશ્ચ નિર્ઝરિઃ ॥ ૧૦૨॥

ગુહામિશ્ચ વિરાજન્તે ચત્વારસ્તે નગોત્તમાઃ ।
તત્પ્રમોદવને સન્તિ મધુરાણિ નવાનિ ચ ॥ ૧૦૩॥

દ્વાદશ વનરત્નાનિ તન્નામાનિ શ્રૃણુષ્વ મત્ ।
શ્રીશ્રૃગારવનં ભાસ્વદ્વિહારવનમદ્ભુતમ્ ॥ ૧૦૪॥

તમાલં ચ રસાલં ચ ચમ્પકં ચન્દનં તથા ।
પારિજાતવનં દિવ્યમશોકવનમુત્તમમ્ ॥ ૧૦૫॥

વિચિત્રાખ્યં વનં કાન્તં કદમ્બવનમેવ ચ ।
તથાઽનઙ્ગવનં રમ્યં વનં શ્રીનાગકેશરમ્ ॥ ૧૦૬॥

દ્વાદશૈતાનિ નામાનિ વનાનાં કથિતાનિ તે ।
સર્વેષુ સાન્દ્રનીલાભ્રનિભેષુ વિપિનેષુ ચ ॥ ૧૦૭॥

નિવિડેષુ નવા નિત્યા વિચિત્રા વિવિધા દ્રુમાઃ ।
ચિન્મયાઃ કમનીયાશ્ચ કિશોરાઃ કામવિગ્રહાઃ ॥ ૧૦૮॥

સુસ્નિગ્ધાઃ કોમલાઃ સૂક્ષ્માશ્ચ્યોતન્ત્યમૃતવિપ્રુષઃ ।
નવીનૈઃ પલ્લવૈઃ શ્લક્ષ્ણૈર્મૃદુલૈર્વાયુચઞ્ચલૈઃ ॥ ૧૦૯॥

વિચિત્રૈર્લમ્બિતૈર્નીલહરિત્પીતારુણૈ ર્ઘનૈઃ ।
પુષ્પાણાં પઞ્ચવર્ણાનાં દિવ્યાયાં ચ સુગન્ધિનામ્ ॥ ૧૧૦॥

નવાનામપ્રમેયાણાં નિત્યાનામભિતો ભૃશમ્ ।
પ્રફુલ્લાનાં સુધાસ્વાદુફલાનાં ચ વિશેષતઃ ॥ ૧૧૧॥

મહાભારેણ શાખાભિર્લુણ્ઠન્તિ ધરણીતલે ।
દિવ્યસ્વર્ણમહારત્નજાલૈશ્ચિત્રિત વેદિકાઃ ॥ ૧૧૨॥

પઞ્ચ પ્રકારસત્પુષ્પવ્રતત્યો ધવિતાનકાઃ ।
સુવર્ણવલ્કલાસ્તત્ર મુક્તાપુષ્પાવતંસકાઃ ॥ ૧૧૩॥

લતાશ્ચિન્તામણિફલા રત્નપલ્લવશોભિતાઃ ।
નાનાપુષ્પરજઃ પૃક્તશબલાઃ ષટ્પદા મુદા ॥ ૧૧૪॥

અનન્તા યત્ર ગુઞ્જન્તિ ભ્રમન્તો ગન્ધગૃન્ધવઃ ।
મત્તાઃ પુષ્પરસં પીત્વા પતન્તિ પૃથિવીતલે ॥ ૧૧૫॥

પુનરુત્થાય ધાવન્તિ પુષ્પૌઘેષુ મુહુર્મુહુઃ ।
પ્રવિલીય પલાયન્તે દ્રુમમન્યં હિ યૂથશઃ ॥ ૧૧૬॥

સમન્તાદ્ ભ્રમરીભિસ્તે વિક્રીડન્તે સમં મુદા ।
અનન્તા નિર્વૃતા મત્તાઃ ક્વચિત્ કૂજન્તિ કોકિલાઃ ॥ ૧૧૭॥

સારિકાશ્ચ શુકાશ્ચિત્રાઃ ક્વચિદ્ ગાયન્તિ સઙ્ઘશઃ ।
કચિત્પારાવતવ્રાતાઃ કપોતાશ્ચક્ક ણન્તિ હિ ॥ ૧૧૮॥

રટન્તિ રાગિણોઽત્યન્તં ચઞ્ચલાશ્ચાતકાઃ ક્વચિત્ ।
ચન્દ્રમણ્ડલસઙ્કાશાઃ પ્રમદાભિર્મુદાન્વિતાઃ ॥ ૧૧૯॥

હંસા મુક્તાશ્ચ ખાદન્તો નદન્તિ મધુરં ક્વચિત્ ।

ક્વચિત્ ક્રૌઞ્ચશ્ચકોરાશ્ચા કલહંસાશ્ચ સારસાઃ ॥ ૧૨૦॥

વિચિત્રાઃ પક્ષિણશ્ચાન્યે સ્વયોષિદ્ભિર્મનોહરાઃ ।
રમન્તે નાદયન્તશ્ચ વનં નાનારવૈર્ભૃશમ્ ॥ ૧૨૧॥

તિરસ્કૃતામૃતસ્વાદુફલાનિ વિવિધાનિ ચ ।
અદન્તિ તેષુ સર્વેષુ વિચિત્રેષુ વનેષુ ચ ॥ ૧૨૨॥

પ્રનૃત્યન્તિ મયૂરીભિઃ સાર્ધં મત્તાઃ શિખણ્ડિનઃ ।
નિત્યશ્રીકર્ણિકારાશ્ચ કુન્દવૃન્દાશ્ચચમલ્લિકાઃ ॥ ૧૨૩॥

લવઙ્ગલતિકા જાત્યો માલત્યો યૂથિકાસ્તથા ।
માધવ્યશ્ચૈવ કેતક્યો વાસન્ત્યઃ પરમાદ્ભુતાઃ ॥ ૧૨૪॥

સ્થૂલપદ્માશ્ચ કજ્જાશ્ચ સેવન્ત્યો વિવિધાસ્તથા ।
અન્યાશ્ચિત્ર લતાઃ સ્વૈઃ સ્વૈ પુષ્પૌઘૈર્વિવિધૈર્ભૃશમ્ ॥ ૧૨૫॥

પ્રકુર્વન્તિ વને સર્વં દ્રવ્યં ગન્ધાધિવાસિતમ્ ।
વાતાશ્ચ શીતલા મન્દા સુગન્ધાસ્તદ્વને સદા ॥ ૧૨૬॥

પ્રવાન્તિ પરમાનન્દવર્ધનાઃ ષટ્પદાનુગાઃ ।
નાનાપુષ્પરજોભિશ્ચ રઞ્જિતા ભૂર્વિરાજતે ॥ ૧૨૭॥

કચિત્પીતા કચિન્નીલા હરિદ્રક્તા સિતા ક્વચિત્ ।
પાદપપ્રચ્યુતૈઃ પુષ્પૈરાચ્છન્ના પઞ્ચવર્ણકૈઃ ॥ ૧૨૮॥

કુથેવાભાતિ વિસ્તીર્ણા ચિત્રવર્ણા ક્વચિત્ ક્વચિત્ ।
દીર્ઘિકા વિવિધાસ્તત્ર મણિનિર્મલવારિણા ॥ ૧૨૯॥

પૂર્ણા માણિક્યસોપાનાઃ સ્ફટિકોપલકુટ્ટિમાઃ ।
તીરસ્થદ્રુમસચ્છન્નાઃ પ્રફુલ્લવિવિધોત્પલાઃ ॥ ૧૩૦॥

કૂજત્પક્ષિગણૈશ્ચિત્રૈર્ગુઞ્જદ્ભૃઙ્ગૈર્નિનાદિતાઃ ।
ફૂલ્લપઙ્કજકલ્લોલજલા ગુઞ્જન્મધુવ્રતાઃ ॥ ૧૩૯॥

પુષ્કરિણ્યો દ્વિજોદ્ઘુષ્ટદ્રુમગુલ્મલતાચયાઃ ।
તટાકાનિ સરમ્યાણિ વિશાલાનિ વને વને ॥ ૧૩૨॥

વિચિત્રમણિસોપાનતીર્થાનિ વિવિધાનિ ચ ।
કુણ્ડાનિ કમનીયાનિ સન્તિ સ્ફટિકવારિભિઃ ॥ ૧૩૩॥

સન્નાદિતવનાન્તાનિ નદદ્ભિશ્ચિત્રપક્ષિભિઃ ।
પ્રાસાદા મણ્ડપાઃ સાન્દ્રકાનનેષુ ક્વચિત્ ક્વચિત્ ॥ ૧૩૫॥

મધ્યે મધ્યે પ્રદીપ્યન્તે વેદિકા વિવિધાસ્તથા ।
કાઞ્ચનાશ્ચન્દ્રકાન્તૈશ્ચ મણિભિશ્ચિત્રિતા ક્વચિત્ ॥ ૧૩૬॥

ચિન્તારત્નૈઃ ક્વચિચ્ચેન્દ્રનીલરત્નૈર્વિચિત્રિતાઃ ।
પદ્મરાગૈઃ પ્રવાલૈશ્ચ ક્વચિદ્ વ્રજૈઃ સ્ફુરત્પ્રભૈઃ ॥ ૧૩૬॥

વૈડૂર્યૈર્ભાસમાનૈશ્ચ સ્યમન્તૈઃ ખચિતઃ ક્વચિત્ ।
ક્વચિદ્વંશચ્છ દૈર્ભાતૈર્મણિક્યૈશ્ચ મનોહરૈઃ ॥ ૧૩૮॥

હરિદ્રત્નૈશ્ચ મુક્તાભિઃ પ્રવાલૈશ્ચાપિ મણ્ડિતઃ ।
અન્યેર્વિચિત્રરત્નૈશ્ચ મૃદુલાસ્તરણેસ્તથા ॥ ૧૩૯॥

મુકાદામવિતાનૈશ્ચ દર્પણેશ્ચાપ્પલઙ્કૃતાઃ ।
મુક્તાપુષ્પલતાજાલકુજ્જાનિ મઞ્જુલાન્ચલમ્ ॥ ૧૪૦॥

ભૃઙ્ગપક્ષિપ્રઘુષ્ટાનિ તદ્વને સન્ત્યનેકશઃ ।
વસન્તો હિ કચિત્ તત્ર નિત્યમેવ વિરાજતે ॥ ૧૪૧॥

નિદાઘશ્ચ ક્કચિત્ પ્રાવૃટ્ ક્વચિન્નિત્યં શરત્ તથા ।
હેમન્તશ્ચ ક્વચિન્નિત્યં શિશિરો વર્તતે ક્વચિત્ ॥ ૧૪૨॥

ષડેતે ઋતવઃ સ્વસ્વભૂત્યા વૈ સંવસન્તિ હિ ।
દેશી દેવગિરિશ્ચૈવ વૈરાટી ટોડિકા તથા ॥ ૧૪૩॥

લલિતા ચૈવ હિણ્ડોલી રાગિણ્યઃ ષટ્ પ્રકીર્તિતાઃ ।
મૂર્તિમતીભિરેતાભિઃ સ્વપત્નીભિર્મનોહરઃ ॥ ૧૪૪॥

વસન્તો મૂર્તિમાન્ રાગો વસન્તે વર્ત્તતે સદા ।
ભૈરવી ગુર્જરી ચૈવ રેવા ગુણકરી તથા ॥ ૧૪૫॥

વઙ્ગાક્ષી બહુલી ચૈવ રાગિણ્યઃ ષટ્ સુવિગ્રહાઃ ।
એતાભિઃ સ્વસહાભિર્યોયોષિદ્ભિર્ભૈરવોઽદ્ભુતઃ ॥ ૧૪૬॥

રાગઃ સંવર્તતે નિત્યં નિદાઘે મૂર્તિમાન્ સ્વયમ્ ।
મલ્લારી સોરઠી ચૈવ સાવેરી કૌશિકી તથા ॥ ૧૪૭॥

ગાન્ધારી હરિ શ્રૃઙ્ગારા રાગિણ્યઃ ષટ્સુખપ્રદાઃ ।
સુરૂપાભિઃ સ્વભાર્યાભિરેતાભિમૂર્તિમાન્ મહાન્ ॥ ૧૪૮॥

પ્રાવૃષિ પ્રીતિકૃન્નિત્યં મેઘરાગઃ પ્રતિષ્ઠિતઃ ।
વિભાસી ચાથ ભૂપાલી માલશ્રી પટમઞ્જરી ॥ ૧૪૯॥

વડહંસી ચ કર્ણાટી રાગિણ્યોઽદ્ભુતવિગ્રહાઃ ।
સ્વદારૈઃ ષડ્ભિરેતાભિઃ પુત્રપૌત્રસ્નુષાદિભિ ॥ ૧૫૦॥

રૂપવાન્ પઞ્ચમો રાગઃ સર્વદા શરદિ સ્થિતઃ ।
કામોદી ચાપિ કલ્યાણી હ્યભીરી નાટિકા તથા ॥ ૧૫૧॥

સાલઙ્ગીનટહમ્મીરી રાગિણ્યઃ સુરતિપ્રદાઃ ।
દિવ્યરૂપાભિરેતાભિઃ સ્વસ્ત્રીભિર્દિવ્યરૂપવાન્ ॥ ૧૫૨॥

હેમન્તે સર્વદા રાગો દીપકાખ્યશ્ચ તિષ્ઠતિ ।
માલવી ત્રિવણી ગૌરી કેદારી મધુમાધવી ॥ ૧૫૩॥

પાર્વતીયા તથા ચૈવ રાગિણ્યઃ શ્રુતિસૌખ્યદાઃ ।
ષડ્ભર્ભિર્મૂર્તિમતીભિઃ સ્વનાયિકાભિશ્ચ મૂર્તિમાન્ ॥ ૧૫૪॥

શિશિરે સંસ્થિતો નિત્યં શ્રીરાગઃ સકુટુમ્બકઃ ।
રાગાઃ ષટ્પુરુષાશ્ચેત્થં ષટ્ત્રિંશચ્ચ તથા સ્ત્રિયઃ ॥ ૧૫૫॥

રાગિણ્યઃ પરિવારૈશ્ચ નિવસન્તિ સદા વને ।
પ્રમોદકાનનં ષષ્ઠમેતદાવરણં મહત્ ॥ ૧૫૬॥

તવ ભક્ત્યા પ્રસન્નેન મયા પ્રોક્તં દ્વિજોત્તમ ।
તતશ્ચ સરિતામાદિકારણં સરયૂ સરિત્ ॥ ૧૫૭॥

શ્રીમતી શાશ્વતી નિત્યં સર્વલોકૈકપાવની ।
સચ્ચિદ્ઘનપરાનન્દરૂપિણી રામવલ્લભા ॥ ૧૫૮॥

વિરજાદ્યાઃ પરા નદ્યો યસ્યાંશાલ્લોકવિશ્રુતાઃ ।
યન્નામોચ્ચારણાત્ સદ્યો મુક્તાઃ સંસારબન્ધનાત્ ॥ ૧૫૯॥

પ્રાપ્નુયુર્દિવ્યદેહં ચ સસીતં રઘુનન્દનમ્ ।
તજ્જલં નિર્મલં કાન્તં ગમ્ભીરાવર્ત્તશોભિતમ્ ॥ ૧૬૦॥

ઉત્તુઙ્ગ વિલસદ્વીચિધવલીકૃતદિઙ્મુખમ્ ।
મન્દીકૃતશરચ્ચન્દ્રકરં ચન્દ્રમણિપ્રભમ્ ॥ ૧૬૧॥

તિરસ્કૃતસુધાસ્વાદુ કુન્દવૃન્દ હિમદ્યુતિ ।

પ્રફુલ્લૈઃ પઙ્કજૈરક્તૈઃ શુક્લૈઃ પીતૈઃ તથાઽસિતૈઃ ॥ ૧૬૨॥

અન્યૈર્નાનાવિધૈર્દિવ્યૈઃ સુગન્ધીકૃતમદ્ભુતમ્ ।
હંસૈઃ ક્રૌઞ્ચૈશ્ચકોરૈશ્ચ ચક્રવાકૈશ્ચ સારસૈઃ ॥ ૧૬૩॥

સદારૈરતિકૂજદ્ભિશ્ચિત્રૈશ્ચાન્યૈઃ પતત્રિભિઃ ।
ભ્રમદ્ભિર્ભ્રમરૈર્મત્તૈર્ગુઞ્જદ્ભિર્મધુરસ્વરૈઃ ॥ ૧૬૪॥

મત્તાભિર્ભ્રમરીભિશ્ચ સમન્તોન્મુખરીકૃતમ્ ।
મણિભિશ્ચન્દ્રકાન્તૈશ્ચ પદ્મરાગૈશ્ચ કૌસ્તુભૈઃ ॥ ૧૬૫॥

ક્વચિદ્ વંશચ્છદૈર્વ જૈશ્ચેદ્રનીલૈઃ સ્યમન્તકૈઃ ।
ચિન્તારત્નૈશ્ચ વૈડૂર્યૈર્મુક્તાભિઃ સ્ફટિકૈઃ ક્વચિત્ ॥ ૧૬૬॥

માણિક્યૈશ્ચ ક્વચિદ્રત્નૈર્નાનાવર્ણૈઃ સકાઞ્ચનૈઃ ।
ખચિતાનાં સુતીર્થાનાં સહસ્રાણાં તટદ્વયે ॥ ૧૬૭॥

પ્રતિવિમ્બૈર્જલં સ્વચ્છં નાનાવર્ણં પ્રકાશતે ।
વજ્રસ્ફટિકમુક્તાનાં સૂક્ષ્મચૂર્ણાનિ બાલુકાઃ ॥ ૧૬૮॥

તથા ચન્દ્રમણીનાં ચ દ્યોતયન્તિ સરિત્તટે ।
એવં શ્રી સરયૂ રમ્યા પરમાનન્દદાયિની ॥ ૧૬૯॥

સપ્તમાવરણં વિદ્ધિ સાકેતસ્ય સરિદ્વરા ।
સપ્તાવરણમધ્યે તુ રાજતે રામવલ્લભા ॥ ૧૭૦॥

અયોધ્યા તત્પરા બોધ્યા સાન્દ્રાનન્દૈકવિગ્રહા ।
ઇતીદં વર્ણિતં નિત્યં સપ્તાવરણસંયુતમ્ ॥ ૧૭૧॥

શ્રી સાકેતાભિધાનં શ્રીરામધામ પરાત્પરમ્ ।
રામધામ્નઃ સ્વરૂપં ચ મહાત્મ્યં મુનિસત્તમ ॥ ૧૭૨॥

પઠેદ્વા શ્રૃણુયાન્નિત્યં ય એતદ્ ભક્તિસંયુતઃ ।
સ ગચ્છેત્ પરમં ધામ સાકેતં યોગિદુર્લભમ્ ॥ ૧૭૩॥

જ્ઞાનં યોગશ્ચ ધ્યાનં ચ તપશ્ચાત્મવિનિગ્રહઃ ।
નાના યજ્ઞાશ્ચ દાનાનિ સર્વતીર્થાવગાહનમ્ ॥ ૧૭૪॥

એતસ્ય પાઠમાત્રેણ શ્રવણેન ચ યત્ ફલમ્ ।
ભવેત્ તસ્ય ભરદ્વાજ સહસ્રાંશં ન ચાપ્નુયુઃ ॥ ૧૭૫॥

શ્રીભરદ્વાજ ઉવાચ -
તત્ત્વામૃતં પીતમનન્યચેતસા સુધાધિકં ત્વન્મુખનિર્ગતં મયા ।
ધન્યોઽસ્મ્યહં નાથ પદદ્વયં પ્રભો નમામિ નિત્યં ચ તવાસ્મિ કિઙ્કરઃ ॥ ૧૭૬॥

ઇતિ શ્રીમદ્ વશિષ્ઠસંહિતાયાં શ્રીમદ્વશિષ્ઠભરદ્વાજ સંવાદે
નિત્યશ્રીરામધામ સ્વરૂપ વર્ણનાત્મકઃ ષડ્વિંશતિતમોઽધ્યાયઃ ॥ ૨૬॥

Proofread by P. Sudarshana

*Paratpara Shrirama Dhamavarnanam*
pdf was typeset on February 11, 2024

Please send corrections to *sanskrit@cheerful.com*